रीरकलेवरमंगं यस्याः। चित्रश्रमजलसिक्तकलेवरयेति पाठः सम्यगस्ति। कीदृशं कृष्णं मत्सुरतोत्कर्षेण मदनकृतो मदो हर्षस्तेनातिशयेन लोलं लोका येचकलं चंचलं
वरमिति विस्तः॥ ॥

त्या द न प ते न र

गी
२१ पुनः कीदृशया मया। कोकिलस्य कलो व्यक्त मधुरो यो ध्वनिः शब्दः तद्वत्कूजितं शब्दितं यस्यास्तया। अनेन कूजितारवं वा रवमुक्तं। तदुक्तं पंचमाख्यकैः पिकशिखिकलहंसप्रायैः पक्षिव्रजानां स्वनितमनुकरोति विदग्धा नाम मन्मथार्तो मुखदशनविपर्ये तत्करिकापि द्रावयदेति स्वनितमिति समासा विमृश्य सम्भोगकाले। ननु वात्स्यायनादिभिः
स्वेन्यत्र एवं क्रममुक्तः। तदुक्तं। आश्लेषं प्रथमं कुर्यात् द्वितीयं चुंबनं तथा। तृतीयं नखदानं च दंष्ट्रादानं चतुर्थकं पंचमं केशग्रहणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं कण्ठशब्दं च देवेन चाष्टमं रतमिति। तथा चाक्रकटशब्दस्य सप्तमरतस्यायं वैषम्यात् नखदानादिरतान्याकरोत् श्रीकृष्णस्य रसिकताभागः स्यादित्यत आह। जितेत्यादि। जितो वशीकृतो मनसिजो येन तस्य काममशास्त्रस्य विचारोयं नां। अयं भावः। चतुःषष्टिकलाकुशलस्यापि परमरसिकनायकस्य जगदीश्वरस्य स्वानुकूलो तमनायिका सान्निध्ये

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारम्। स्मर॥
कुसुमाकुलकुंतलया नखलिखितघनस्तनभारं॥ ॥

रससमग्रतया क्रमस्मरणाभावान्न दोषः। तदुक्तं। रतिचक्रप्रवृत्तस्य नैव शास्त्रं न च क्रम इति। पुनः कीदृश्या मया। स्रस्ताः केशग्रहणपूर्वकचुंबनादिदानेन शिथि
लाः कुसुमैराकुला व्याप्ताः कुंतलाः केशकलापा यस्यास्तया। पुनः कीदृशं कृष्णं। नखैर्लिखिताः कृतयुक्ताः कृताः स्तनभारो येन तं। अनेन लिखितपत्रावलीदाना राम
नंतरं जयचारुस्तनदानमुक्तं। पंचमायकाः आत्मपर्यंकस्थं स्फुरितो हर्षो यो यस्याः कृष्णपंकजपत्रसदृशादामूलवक्षःस्थलेन मिश्रभावस्थापयोगमनुभवमहे इति। तत्र
घनशास्त्रयोः। इति विश्वः। चिकुरः कुंतलो वालः कचः केशः शिरोरुहः इत्यमरः॥ ९ ९॥ ९ ९ ९ ९ ९ ९ ९॥ २१

तदुक्तं २

अर २ पा ख खा भाग तो
रताकल्पं तं पेचवेंद्या लिंगनादिसम्प्रविधं वा दूरतमुक्तं। स्मृतिवंधारवं भ्रमरतमाहा चरणेत्यादि चरणयोः रणितस्य प्रमाणेन मणिरवं विजेतुं नूपुरो यस्यास्त
या। एतं भ्रामरकं नाम विपरीतरतमभिप्रायेण। तदुक्तं रतिरहस्ये। चक्रवद्भ्रमणं कुर्विता स्त्रिका मे रंजनघनं समुच्छ्रिते इति। कीदृशं परिपूरितं सुरतं विना नेरेति
विस्तारोपनतं। अनेन नायककान्ते कावेधाः कथिताः भ्रामरकवेधः भ्रांता किं शत्रप्रसाधनस्थितां मां स्वपनमभिरम्भयेत् इति भावः। पुनः कीदृशया मया। पूर्वमुखरा
शब्दायमाना यस्मात् विश्लेषखानुचितगुणा मेखला कांचीयस्यास्तया। अनेन पुरुषायितनामकविपरीतरतमुक्तं। तदुक्तं वात्स्यायनो पुरुषायितप्रकरणे। स जघ

चरणरणितमणिनूपुरया परिपूरितसुरतवितान॥
मुखरविशृंखलमेखलया सकचग्रहचुंबनदानम्॥

नमेवदोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितमिति तत्र सर्वत्र शब्दो मनोरमाकारणव्याख्यानं मध्यात्पूर्वपश्चिमभागेदक्षिणोत्तरभागे
चेति॥ रतिरहस्येपि। सर्वतः कटिमत्र भ्रमेयदि प्रेंखपूर्वमिदमुक्तं मूलिनमिति अयं चापि सर्वशब्दार्थसन्देहः। कीदृशं कृष्णं। सकचग्रहं केशग्रहसहितं चुंबनदानं यस्मिन्
केशग्रहणपूर्वकं चुंबनं विपरीते रवोक्तं। तदुक्तं। अंगोरचुंबनं कार्यं पुंसालिंगनपूर्वकं। विपरीतरते नार्यास कचग्रहचुंबनमिति। मेखलाव सूचविशेषस्याक्तां चीसे
वनितवयोरति विशेषप्रकाशः॥

नेर पशा३ ५३

गी॰गो॰ २० पुनः कीदृश्यामयारतिसुखसमयेसुखन्… सुखप्राप्तिकालेलोकोत्तरानुभवकाष्ठांप्राप्तोयः संभोगशृंगारस्तेनालसयामंथरयाकीदृशंरसमुकुलितेसुद्रितेनयनसरोजेनेत्रकमलेयस्यतं। एतेनयुगपदेवद्वयोरानंदस्वपूर्तिःसूचिता।नतु… रतिरहस्येमंकु… नामीलनंचनगोप्यं… कालेस्पल… पुनःकथंभूतयामयानिःसहाअसमर्थाअतएवक्षितौ… पतिताततनुलताययास्यास्तया। अनेनसुरतान्तसमये… तदुक्तं। अंगैःस्वेदः इत्यर्थं… तेषुस्यात् … सारविद्युद्वग्गुल्म… कृपाकलापः संभविष्यतीत्यतआह। मधुसूदनमिति। मधुनामानं दैत्यंसूदितवान्यस्तस्यापि… सारविरुद्धं… विचारशक्तिपार्श्वेश्रमइतिभावः। कीदृशंमधुसूदनं। उदितस्ततःकालेत्रुटितमुक्ताहाकारकोऽचिगुरुस्वरूपस्यानेपुनःसं…

रतिसुखसमयरसालसया रसमुकुलितनयनसरोजम् । निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥ श्री

जयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं । सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलम् ॥ ८

… अवसानेपिचपूर्तिरुपचारेरूपेस्ते … संज्ञातपुष्पोषस्त्रोगीपीतस्येश्च … विलोकनादिनावपुनरामंभूतोमनोजः कामोयस्यतं … तदुक्तं … रसे … तुपस्पादुद्वारहत्तविरहत्वेनापितोगोमुले राम २०

तासंविधमकथापागौरतेतनयेतयामिति। … नायिकानतु … स्मृतिते … स्वगुरुकार्य … शिष्योक्तंवि … श्रावकानांचकी

र्तिनावदातिता भरत कवीदाने श्रीजयदेवस्यपदं … श्रीजयदेवकविनाभणितं … तामागोपवधूराधिकयाःकथितंवचनेनतस्सुखं … विस्तारयतुपठतांश्रावकानांचकी

दृशंमधुरिपोःश्रीकृष्णस्यनिधुवनंसुरतंतस्यशीलयतीत्येवंरूपं। आयोजनंनिधुवनं सुरतं संप्रमितःस्मरः ॥ चेरत

ति त नो त

कथितइति। अत्रभोकस्यमनोरथान्तरमाह। हस्तेत्यादिहेसखिअहंगोविंदंकाननेपश्यामिकदाचिद्गोविंदस्यदर्शनंममभविष्यतीत्याशंसायांलकृत्। अतएवहृष्यामितदृशनं तत्रआनंदोममकदाचिद्भविष्यतीत्याशंसैवपश्यामिहृष्यामीति … अन्यवधूभिः भविष्यत्सामीप्यवर्तमानता। कीदृशं व्रजसुन्दरीगणावृतं। गोपवधूकदंबपरिवृतंननुसपत्नीभिःपरिवृतंदृष्ट्वाकथंतेहर्षोभविष्यतीत्यतआह। मामित्यादि। मामुद्वीक्ष्यदृष्ट्वाविलज्जितंअन्यवधूभिःपरिवृतोहंमनयादृष्टइतिहेतोर्विकारसूचकं। यतस्मिंतेनदेवसुधामुग्धाननंयस्यतं … मानेनसुखंयस्यतं। तथाचसुन्दरीशतवृतोपितद्गतदाक्षिण्यः। सापराधमात्मानंमन्यमा

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्वल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं ।
मामुद्वीक्ष्यविलज्जितंस्मितसुधामुग्धाननंकाननेगोविंदंव्रजसुंदरीगणवृतंपश्यामिहृष्यामि
च ॥

नोमांजोविभेतीतिहर्षउचितएवेतिभावः। पुनःकीदृशंअनृजुःकुटिलाभ्रूवल्लिभ्रूलतायस्यमेनादृश्योपायवल्लवीगोपवधूस्तासांवृंदंसमूहमसरयत्पपसारयतीतिवंशीलंदृगंतवी
क्षितंवीक्षितनेत्रांतेनावलोकितं यः … गमनायो … नेत्रांतचेष्टया … गोपीरपसारयतीत्यर्थः। पुनःकीदृशं। हस्तात्स्रस्तः। मर्दनेनसाध्वसवशात् … ललि
तोविलासवंशःपृथुः … पुनःकीदृशं। अतिशयेनस्वेदैःप्रस्वेदैराद्रौंगंडस्थलयस्यतं। सर्वंमामुद्वीक्ष्येत्यस्यसंबंधः ॥ ९ ॥ १० ॥ ११ ॥

गी.टी.० त्रुकं१ कृ१११

२१ सखि वैर्यमवलंबस्व मिलिष्यति त्वां हरिः भैरसा श्वासयन्ती दूती मेव तर्पयितुमाह इति लोकः इति हे सखि त्वं कोऽल्पः सन्नवकोशुच्छोपस्या एतादृशी यानभिकाउतिनकुशोकुलंतिकं सम्पाशोरेखा
तस्या विकाशः उद्दोधो दुरालोको दुःखेनालोकितुं शक्यः नावि केसन्नुड्डसेकः लोनिकेसन्त्रानुकंपायाकः मद्भूसपालिनात एवानुकथ्यापशोकुलतिकादुरालोकति भावः किं म परका
स्मरः सस्सा तसंबधियदुः पवनं तत्से वधीपुः पवनो वायुस्सोपि सुथपतिं दुःखदत्तानि काम्मारइन्मेन नवायो शैत्यकथिनउपवनसंबंधित्वेन च सौगंध्यं मांद्यं च ध्वनितं प्रजो वनेहृद्देरूपह
जगनि त्वेन मंद एव वायुर्भवती ति। पद्मास्तोकसादि वीर्यो रेवविशेषणं तेदास्तोकस्तवकनवकाशोकलतिका विकाशयन्ती तेवं भूतः पवनो व्यथयती सन्न यः तन्नभिमुखमागच्छन्सुख
नो चला दिनानि चार्यन्ता मित्यत आह दुरालोकः अतीदिपरन्पर्थः तथा चाकस्मादेव एतन्नद शयइति भावः अपि दीर्घरणो गोवहूने पर्वनेव त्तमानान्नूतानामाम्रणां मुकुलसूनि२ चे पद्धि५

श्लो.क. दुरालोकः स्तोकस्तवकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपि व्यथयति। अपि भ्राम्यद्भृंगीरणि
तैरणीयानसु — — कुलप्रसूतिश्चूतानां सखिशिखरिणीयं सुखयति॥२७

म इति श्रीगीतगोविंदे द्वितीयः सर्गः समाप्तः॥

अ पिकुजंलोकूमोपिन सुखयति। विकाशदशायां तु कोवेदकिंकरिष्यतीत्यपिकब्दिनार्थः चिंतापेद्भूरिकिंदृशी मुकुलप्रसूतिः शिखरिणीप्रशस्ताग्रभागवतीसर्थः शिखरिणीति प्रशंसायाम
मिनः पद्माह्यं शिखरिणीमल्लिकान सुखयति सर्थः। कैदृशः भ्राम्यतानां भृंगीनां भ्रमणरणितान्यतिरणितानि भ्रमणं पादिरूपाणि नामकैर्कंदइदमित्यपि ध्वनितेनत्वः कृणंदुर
निरन्तरसेद्भुदैरिंकुत्रायमनसालागः शिखरिणीति। श्लोकोल्मे चानकेरतीविश्वप्रकाशः॥ स्याग्नं ... सावर्कं उत्सवरः लिताम्पोति पानी दक्षश्चारस्तिलि प्रियंगुश्चितिविश्वप्रकाशः॥ राग
कुमारः सरसासमरंस्त्री रत्ने मल्लिकायां च प्रोक्ता शिखरिणी बुधैरिति विश्वप्रकाशः॥ काव्यं गीत सुलोरि दुर्लभप्रथस्याप्रसादादिभिर्दृश्यं कांजविलासवर्णनरससहचापिलो
कोत्तरं सर्वं यैनदस्मूहराणतुदितपद्मावतीवल्लभः सेयं तीवेद्र सम्मेजरीनरवेपलश्यांकरोयेशिरः शौर्यक्षांशुकरमिश्रगिरिविनायारसपंजपल्लवालिनाथतपितायं द्विनीयः सर्गः॥ २१

दुष्क

धा२ माजं१ दुग१

राधायाः कृष्णविषयिणीमुत्कंठामुक्का संप्रति कृष्णस्यापि तस्यामुत्कंठामाह। कंसारिरपीत्यादि। कंसारिरपि कृष्णोपि व्रजसुंदरी स्तनो गोहेर्भे विगशेष
णमाह। राधामिति राधां हृदये आधाय आरोप्य। सुंदरीपदेन वङ्कवचनेन च सौंदर्यवतीरपि वह्नीः व्रजसुंदरीरिति कथनेन कृष्णस्य राधायामनुरागातिशयो ध्व
नितः। कीदृशीं राधां। संसार विषयिणी यावासना संस्कारस्तस्य बंधाय श्रृंखला मिव। अनेनाऽरस्सिलारव्यापथमावस्थाकथिता। तत्र दर्शनादशा
यके अभिलाषः स्पृहा तत्र काव्ये सर्वांगसुंदरी। दृष्टेक्षते वा चापि विस्मयानंदमाप्नुमाइति। श्रृंखलापुष्करी वस्त्रबंधेपि निगडेपि चेति विश्वप्रकाशः। इ
ति इत्यादि। स माधवः कलिंदनंदिन्या यमुनायास्तटात कुंजेनीरथांतलतापिहितादरेगृहे निषसाद निषण्णः। अत्र माधवपदेन मालक्ष्मीस्तस्या अपि
कंसारिरपि संसारवासनाबद्धश्रृंखलां राधामाधाय हृदये तत्याज व्रजसुंदरीः॥ १ इतस्ततस्तामनुसृत्य व्रजे १
राधिकामनंगबाणव्रणखिन्नमानसः। कृतानुतापः स कलिंदनंदिनीतटांतकुंजे निषसाद माधवः॥ ३

धवः स्वामी यदि रहव्याकुलो व भूवेति राधायाः सौभाग्याधिक्यं ध्वनितं। किं कृत्वा इतस्ततः तेषु तेषु स्थानेषु तां हृदयनिहितां राधिकां अनुसृत्य अन्विष्य
कीदृशः अनंगः काम स्तद्वाणस्य यद्व्रणं क्षतं तेन खिन्नं दुःखितं मानसं यस्य स पुनः कीदृशः कृतोनुतापः किमिति मया तस्या अवधीरणं कृतमिति पश्चा
त्तापो येन सः। अनंगबाणेत्यत्रानंगपदेनांगरहितस्यैव बललक्षितानागतस्य कामस्याशेषदुष्टदमनेनापि कृष्णेन निवारणं कर्तुं न शक्यतइति ध्वनि
तं। अनेन कृष्णेन चिंता व्याहृता यावस्था ध्वनिता। तदुक्तं श्रृंगारतिलके। कथं स वल्लभः प्राप्यः किं कुर्यां कस्य सद्गुयेक थमवेदमावश्य इति चिंताभवे
द्यथा॥

गी० गो० २२ कृष्णानुतापमेव गीतेन कथयति। मामियमित्यादि। गीतस्यास्य गुर्जरीरागः प्रतिमठतालः॥ गीतार्थस्तु हरिहरिहा कष्टं सा राधा हा हतादरतया न ष्टवड्डमानतया कु
पितेव गता। ननु सा कुपिता गतेति कथं त्वया ज्ञातमित्यत आह। मामियमित्यादि। मां वधूनिचयेन गोपवधूसमूहेन वृतं विलोक्य दृष्ट्वा चलिता प्रस्थिता विलोकयेत्य
वाहित पूर्वकालेन्का प्रणयस्तेन गोपवधूवेष्टितं मां दृष्ट्वा अवहितकालमपराधस्खलिता ततो ज्ञायते कुपितेति भावः। ननु सा गच्छन्ती त्वया किमिति न निवारितेत्यत आ
सापराधत्वेन या प्रत्यादिष्टा अतिभयेनातिशयितभीत्या मानं निवारिता। भयहेतुमाह। सापराधतयेति। अपराधो राधां विहाय अन्यगोपीभिः सह क्रीडारूपस्तद्युक्ततया
सा चिरविरहेण चिरकालीनमद्वियोगेन किं करिष्यति विहरणागृशा... किमुपायं करिष्यतीत्यर्थः। अथ वा किं वदिष्यति किं मम साकं यावद्वदिष्यति दोषा वदि

गुर्जरीरागे प्रतिमठताले। मामियं चलिता विलोक्य वृतं वधूनिचयेन। सापराधतया मयापि न निवारितातिभयेन॥ हरि
हरि हतादरतया गता सा कुपितेव। किं करिष्यति किं वदिष्यति सा चिरं विरहेण। किं जनेन धनेन किं मम किं गृहेण सु
खेन॥

तीत्यर्थः। यद्वा का कुस्वरेण किं वदिष्यति। मया सह कलहं विदूरीकथयिष्यतीत्यर्थः। तया विना मम जनेन किं आश्रितेन परिजनेन किं प्रयोजनमित्यर्थः। ननु परि
जनं विना गोधनादिरक्षा कथं भविष्यतीत्यत आह। धनेनेति। तया विना मम धनेनापि किं ननु धनं विना गृहरक्षा कथं भविष्यतीत्यत आह। मम गृहेण किं। ननु गृहे वि
ना सांसारिकभोगः कथं भविष्यतीत्यत आह। सुखेनेति। तया विना मम सुखेनापि किं चन्दनादिजन्येन किं प्रयोजनमित्यर्थः। इयं च स्मरावस्था तृतीयाव राम
स्था। तदुक्तं रसार्णवसुधाकरे। अर्थानामनुभूतानां देशकालानुवर्तिना। सादृश्येन परामर्शो मानसः स्यादनुस्मृतिः। अत्रानुभावा निःश्वासो ध्यानं कृत्यविह २२
स्तता। राज्यासनादिविद्वेषइत्याद्याः स्मरकल्पिता इति॥

कृ०१२

उ० गी० अहं तदाननं चिंतयामि स्मरामि कीदृशं रोषभरेण कोपातिशयेन कुटिलभ्रूकुटिला भ्रूयत्र तादृशं। किमिव उपरिभ्रमता संचरता भ्रमरेण आकुलं व्या
प्तं शोणाम्बुजमिव। अत्र रोषारुणमुखशोणपद्मसादृश्यबोधात् वाक्यार्थोपमा हरिणा भवति इव भ्रुवोर्भ्रमरोपमा बोध्या। अनेन गुणकीर्तनाख्या चतुर्थी
अवस्था कथिता। तदुक्तं। अंगप्रत्यंगलीलाभिर्वाक्चेष्टाहसितेक्षणैः। न तत्समं हि शः कश्चिदिति स्याद्गुणकीर्तनमिति। शोणः कोकनदच्छविरित्यम
रः। तामहमित्यादि। अहं वने किं अनुसरामि किं। मिलिता सा अनुकरणं करोमि। इह हृदये किं विलपामि। किं निर्जिरहृथा विलापं करोमि। हृदि संगतानु
दये निहिता अनिशं निरंतरं भृशं अतिशयेन तां रमयामि क्रीडयामि। यद्वा किं शाहः प्रश्नः अहं तां हृदि संगतां अनिशं किं रमयामि। किं वने वा

रोषभ चिंतयामि तदाननं कुटिलभ्रु कोपभरेण। शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥ ३ तामहं हृदि संगतामनिशं भृशं रमयामि। किं वनेनुसरामि
तामिह किं वृथा विलपामि ४ तन्वि खिन्नमसूयया हृदयं तवाकलयामि। तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि॥ ५ नते ॥

तामनुसरामि वृथा विलपामीत्यर्थः। हे तन्वि तव हृदयं असूयया मयि दोषाविष्करणेन खिन्नं खेदयुक्तं आकलयामि पश्यामि। इयं च उद्वेगावस्था
तदुक्तं शृंगारतिलके। यस्मिन्नुत्पन्नरम्येऽपि न च हर्षाय किंचन। विद्वेषः प्राणितव्येऽपि स उद्वेगः स्मृतो यथा इति। अवेद्मीत्यादि। क्व कुत्र गतासि तत अहं न
वेद्मि। तेन तव निकटे न प्राप्तोऽनुनयामि त्वामित्यर्थः। क्वचिन्नु ते नेति पाठः तदा ते नु तेन तव कृतेन अनुनयामि तामित्यर्थः॥ यद्वा नु इति वितर्के। तेन तिलक
रोऽव्ययं तथा च यं मां गलेन कीदृशगतासि तेन तां मा गलेन कीदृशगता ते नु नयामि तव तनुं न यं करोमि तेइति सर्वधमात्र विवेकोऽपि षष्ठी। अनेन विलापाव
स्था कथिता। तदुक्तं शृंगारतिलके। इष्टमाति मनो यस्मिन्नन्यास्वस्थ्यादिनिस्ततः वाचः प्रियाश्रयाः सर्वा प्रलापः स्मृतो यथेति॥ ॥

गी० टी०
२३

इदानीं भावनयाऽऽत्मक्रीडितां प्रत्याह दृश्यसइत्यादि हे सुंदरि पुरेव पूर्वमिव ससंभ्रमं सादरं परिरंभणमालिंगनं किं किमिति न ददासि पुरतो ये दृश्यसे गमागतेविर

हृदयामि हे सुंदरि कृस्य तां ममापराधं क्षम स्वकदापि न वदृहृशं विप्रियं नकरोमि। नकरिष्यामि हृदयं वोन्मादावस्थातदुःकरमारां च सुधाकरे। अनस्मिन्स्त दितिभ्रांति नम्या

दृशविरह्य इव इति पुनः। कि चास्म जाते विवेकः कथयति। हे स्वास्त्यादि हे सुंदरि मम दर्शनं दुःक्षमनेसथेन कामेन त्वं हेदुनोमिसमत्प्रीभवामि। वर्णितमित्युदिजयदेवकेन जयप

देवु नइदं दूरे स्त्रीरिचवर्णितं। कीदृशेन स्त्रगातेनत्र्यथा नृहेरिमितपथः कीदृशेन किंतु विल्वाजयदेवकुलहत्ति ग्रामः समत्वमहत्वात्समुद्र इव तत्र संभवो यस्मात्तदर्शन ऐहि

शीरसागेन चंद्राणयथा समुद्रोत्पन्ने न रागिचंद्रेणत स्मान्नतिः क्रियते तथा तत्कुलस्पृशेन निर्जयदेवेनकृतेति चंद्रमास्य ग्लानि दुरेणा तिलकोहमेरोहिण्या शांति निहार वली

इदानीं कामस्वमेदुःसंप्रयच्छती ति तमेवापालंभगोचरकरोमीत्याशयेनाहृत्हृदीत्यादि हे अनंग कदर्थमपि न मम प्रहर प्रहारमाकुरु। किमुइ जीवितं मे पिहरमानामा

हादेव भ्रमात् क्रुधाक्रोधात् त्वं धावसि। इति किंस्तर्कयामि पयहा उइति। संबोधने हे अनंग प्रहरभ्रात्पामपि किं किमिति धावसि। कादृशे माय प्रियया रहिते विरहिते। त

दृश्यसे पुरतो गतागतमेव मे विदधासि किं पुरेव ससंभ्रमं परिरंभणं न ददासि। कृस्यतामपरं कदापि नवेदृशं न करोमि। देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि ७

वर्णितं जयदेवकेन हरे रिदं प्रणतेन। किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन ८ हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरल

चति स्वेषादेवाहमतस्त्वं मतं मा राणां किमिति करोषीति भावः। यद्यपि मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर नाहरभ्रांत्यानंगाक्रुधा किं मुधाव सि

हृहरः सर्वदा प्रियायुक्तः हलधुनापि यारहिता इति मयि हर भ्रमेन युक्त इति भावः। कामः स्वहरेणात छरीरं भागारहितः हृत इति हर कामस्य महावैरसूचनायानंगपदेन

संबोधनं भ्रमवीजानं स्मृति। होदित्यादि हृदि अयं विशलतानां यास्त्राणालताया हारस्तः हि रहजन्यसंतापशांत्यर्थं धृतः न त्वयं भुजंगमनायकः। सर्पराजो वासुकिरयं

कंठे कुवलयदलानां नीलोत्पलपत्राणां श्रेणी पंक्तिः शोभा पक्षता न तु सा गरलछाति विषकांतिः इयं स्वांगानां यशात्यर्थं हे तमलयजस्य चंदनस्य रजः लिनतु मस्म वे भ

ति। अंगे लिप्तशिथिल चंदनरजं वाया पविरहतापवशाद्धूली भूतमिति रजःपदेनसूचितं। तथा च विशलताया स्वेत्यदीर्घत्वादिदर्शना त्वं वासुकिभ्रमा नीलोत्पलदे

लं ३

ननु तत्कटाक्षादिस्मरणादेव त्वं दुःखं भवति कामस्यात्र को यत्नोपुइत्यत आह। भ्रूपल्लवमित्यादि किमित्याक्षेपेतस्य पारधावं स्मरेण कामेन अत्र

गिंत्र अर्पितानि स्थापितानि इति तर्कयामि न त्वस्त्राणि वारेणाहंकृत्स्थापयितुं शक्तानि न तत्र त्वं त्वेपत आह। निर्जितेत्यादि निर्जितानि जगंति जैस्ता

नि तथा च मे रेदास्ते अंगत्रयजिता न तु स्थापितानीतिभावः। तद्धेनाऽत्र किमिति न स्थापितानीत्यत आह। अनंगेत्यादि। अनंगस्य कामस्य जयाय जंगमदे

वतायांगमनशीलदेवतायां तावत्ययेव त्रैलोक्यजयायापदाद्शादतान्यनोजानमय्यागतानि तनैव स्थापितानीतिभावः। देवतया यदस्त्वदीयतानोनापि

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण। तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि॥ ॥

नपराणिसंगंतुं शक्यतइत्यपि ध्वनितं। कानितान्यस्त्राणीत्यत आह। भ्रूपल्लवमित्यादि भ्रूपल्लवमिव भ्रूपल्लवं तदेव धनुः अपांगतरंगितानि कटाक्षस्प

गतागतानि बाणाः श्रवणपालिः कर्णलता प्रांतमेव गुणः प्रतंचिका अत्र नीलस्निग्धत्वाद्भुवः पल्लवत्वेन रूपणं वक्रत्वेन च धनुष्ट्वेन रूपणं। अपा

गस्य च परमर्मभेदकत्वाद्बाणत्वेन रूपणं कर्णपालिस्त्रदीर्घत्वात् प्रत्यंचिकात्वेन रूपणं। अयागम्भंद्वाहीनेस्मिन्नंते तिलकं यिचीतं विश्वप्रकाशः क

र्णलताग्रेऽप्रतोयका वंशप्रभेदयोरितिच॥

राम
२३

कुसमसायकत्वेन कामः प्रसिद्धोऽतइमानेवं चूतमंजरी रूपान्बाणानुधनुष्यारोप्य मां ताडयिष्यतीति शंकया पुनरपि कामायैवदैन्यं करोतीत्याह। पाणाविति पादिना हे मनसिज मदन त्वं मुपुरः स्थितं चूतसायकमाम्रपुष्परूपबाणं पाणौ हस्ते माकुरु। चापं धनुर्माआरोपय प्रत्यंचिकायुक्तं माकुरु यद्वा चूतसायकं हस्ते माकुरु। हस्तेपि चेत्करोषि तदा अमुं सायकं चापं मा आरोपय मास्वधेहीत्यर्थः। अत्र मानास्ति जयदेवेन मन्मथं प्रति अज्ञानतस्तेनमर्यादापकासिद्धम तु वित्रमि
तिध्वनितं हे क्रीडानिर्जितविश्व क्रीडया लीलया निर्जितं विश्वं जगद्येन तादृशं मूर्छितस्य मूर्छां प्राप्तस्य जनस्य मादृशस्य आघातेन प्रहारेण तव किं पौरुषं कुत्सितपौरुषमित्यर्थः। मूर्छितत्वे हेतुमाह। तस्या एवोत्पादितं तस्या एव मृगीदृशोह्
मध्यपि वनकिमयीत्यर्थः। यद्वा मूर्छिताजनताघातेन तव किं पौरुषं कुत्सितपौरुषमित्यर्थः।

पाणौ माकुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषं ॥
तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते॥ ३

रिणीदृशः प्रेंखत्पसर्पतो ये कटाक्षास्त एव आशुगा बाणास्तेषां श्रेणिभिः पंक्तिभिर्जर्जरितं खंडीकृतं मनो मनागपि स्वल्पमपि न संधुक्षते न स्वस्थं भ
वति तथा च तत्कटाक्षरूपबाणैरहं मूर्छितः सन्प्रतिमयि चूतमंजरीरूपसायकप्रहारो मत्र मामाचरेति भावः। लीलयैव येन विश्वमपि
जितं तस्य तेमूर्छितजनेषु प्रहारो यशोहानिकर इत्यपि ध्वनितं सायकः शरखड्गयोरिति विश्वप्रकाशः। अथ स्त्रियास्त्रायाविनमरः। किं पौरुषमित्यत्राद्रु
तीयव्याख्यापक्षे किं क्षेप इत्यनेन निंदायां समासः। अप्सु गोमारुतेवाणाइति विश्वः॥

स्त्र २

संप्रति राधांगविलसितान्येव स्मरस्य बाणरूपाणि मां पीडयंतीति तस्या एवोपालंभं करोमीत्याशयेन कामसुपेक्ष्य भावनया पुरः स्थितामिव ताम्राधां
संबोध्याह भ्रूचापे इत्यनु पेधनुषि निहितोऽर्पितः। कटाक्षविशेषः कटाक्षरूपो बाणो मम व्यथां मर्मपीडां निर्मातुं करोतु धनुष्यारोपितस्य बाणस्य मर्मपीडनमे
व धर्म इति तदुचितमेव अथ च कुटिलो वक्रः श्यामात्मा श्यामः आत्मस्वरूपयस्य एतादृशः कवरीभारोपि ग्रथितवेणीकेशसंचयोपि मारोद्यमं मारणोद्यमं
करोतु एतदपि उचितं कुटिलस्वभावस्य मारणोद्यमोचितो योऽयं मलिनः कुटिलस्वभवति मान्यमारणाय प्रवर्तते इत्यपि नानुचितं। अथ च हे तन्वि च
मय मपराक्रमकरोतु यद्वा मारस्य कामस्य उद्यमं करोतु। योऽयं मलिनः कुटिलस्वभवति मान्यमारणाय प्रवर्तते इत्यपि नानुचितं। अथ च हे तन्वि अयं
बिंबाधरो बिंबफलतुल्यो धरो मोहं मूर्छां तनुतां तनोतु कीदृशो रागवान् रक्ततावि शिष्टः। इदमपि नानुचितं यतो यो रागवान्स्यात्स यद्युक्तः स परं मोहकरो

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कबरीभारोपि मारोद्यमं
मोहं तावदयं च तन्वि तनुतां बिंबाधरो रागवान्सद्वृत्तस्तन मण्डलस्तव कथं प्राणैर्मम क्रीडति॥ ४

सेचेति। अयं तव सद्वृत्तो वर्तुलः स्तनमंडलः कुचविस्तारो मम प्राणैः कथं कि मिति क्रीडति प्राणग्रहणरूपां क्रीडां किमिति करोति। सद्वृत्तस्य स्व
रितस्य परप्राणग्रहणं हि समनुचितमिति भावः। विराधनामायमलंकारः। सद्वृत्तत्वरूपगुणस्य परप्राणग्रहणक्रियया विरोधकथनात् तदुक्तं काव्यप्रका
शे विरोधः सोविरोधेपि विरुद्धत्वेन यद्वचइति। विशिखास्तु मरेशर इति विश्वप्रकाशः। श्यामा निंदितकेशस्यापि रितिधरणिः आत्मा देहमनोब्रह्मस्वभा
वधृतिबुद्धिषु इति विश्वप्रकाशः। कवरीकेशवेश इत्यमरः। मारो मृतौ स्मरे विघ्ने इति विश्वप्रकाशः। बिंबफले बिंबिकायां स्तनि मंडल इति च। रागोनुरक्तो
मात्सर्य इति। वर्तितवर्तुलं वृत्तमिति शाश्वतः॥ ॥

गी॰टी॰ ननु तस्या अपि नापराधो न वा स्मरस्य किंतु तदंगस्पर्शादि विषयालाभाच्च चलितचेतन्नलं हृः स्वीकरोतीत्यतो भावकत्वया पुरः स्थितामचानन्याह । तानीत्यादि स्प
२५ र्शसुखानि तदंगस्पर्शजन्यानि सुखानि इदानीमनुभूयमानानि तान्यनुभवपूर्वाण्यनुभूतान्येव । एतेन त्वगिंद्रियविषयलाभः कथितः । ईदृशानि नयनस्य लो
चलाः स्निग्धाः स्नेहयुक्ता विभ्रमा विलासाः स्मरसदृशैरनुभूता एव । अनेन चक्षुर्विषयलाभः कः । वक्त्रांबुजसौरभं तस्य मुखपद्मसौरभं तद्वचा । गिराम्
विषयश्राणपतनया गिरात्तत्र च साधुधास्पदां सुधामस्मत संपदा तिस्रवतिसंवशी लोवक्रिमा च किल्व मिदानीं श्रोत्रेणाग्रस्वमुखाः स एव सर्वानुभूतः एव ।
अनेन श्रोत्रेंद्रियविषयसान्निध्यमुक्तं । बिंबाधरमाधुरी तस्याः बिंबफलप्राययोरधरयोर्माधुरी मधुरतां सुनामयास्वाद्यमानामेव सर्वानुभूतैव । अनेन रस
नेंद्रियस्य विषयलाभः कथितः । इत्येवं प्रकारेणाविषयासमोऽपि तन्मद्रियाणां स्वस्वविषयैः सर्वथोपमानं मम नस्त्वत्तस्य कारा धापीत्यग्र समाधितदेका ग्र

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा सा बिंबाधरमाधुरीति विषयास
ङ्गेऽपि चेन्मानसं तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्तते ॥ ॥ इति श्रीगीतगोविंदे तृतीयः सर्गः समाप्तः ॥ ॥

यदि हंत हे जितवेदे तदा विरहव्याधिः कथं वर्तते । अपि शब्दो विरोधाभासालंकारसूचनार्थः । बाह्येंद्रियविषयासंगे समायेऽसंभवात् तात्वेंद्रियवृत्तिनि
रोधे सति स च सम्यक् प्रजायाः एव समाधियदाथंवात् । तथा च तत्तदिंद्रियाणां स्वस्वाभिमतविषयालाभस्य विरहः सम्भवति मम चेत्सा विंद्रियाणां
विषयविच्छेदस्याभावात् मनसस्तु तत्रैकपरत्वात् तया सह विश्लेषएवनास्तीति कथं विरहजन्याधिसम्भव इति भावः । धन्यः स्पर्शशब्दाः स्वविषया
श्च मोइत्यमरः । अपि तु इंद्रियमगाः कर्माणां न मतं तस्मै सुजना विषज्वालालीवमपि सत्यपि मंदाम अधिकाकोकिलेषु । मच्छन्दे स्ववेरिमरुणासुधामिधा
विहारुकेन सम्यक् प्रकाशयतानमपुष्पकृता किंशालिनाथलया इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां गीतगोविंदटीकायां रसमंजरीनाम राम २५
धेयायां तृतीयः सर्गः समाप्तः

पूर्वसर्गे श्रीकृष्णस्य विरहजनिता अवस्था दर्शिता । अत्र तु राधायास्तामाह । अथ मुनेनापदिना राधिकायाः सखी माधवं कृष्णं संप्राप्य वक्ष्यमाणामुवाच । य
थि केतयुत कृपायाः कः कीदृशं माधवं यमुनायास्तीरे वानीरनिकुंजे वेतसलतावने तत्र मंदं म्लानं आस्थितमासीनं तत्र हेतुगर्भं विशेषणमाह । प्रे
मेति । प्रेमभरेण राधाविषयकस्नेहाधिक्येन उद्भ्रांतं उद्विग्नं । तथा च प्रेमभरेणात्याज्ञानपरतया तां माधवं कोपातदन्वेषणं विहाय लतागृहे स्थित
ति भावः । अथ चेतसे रथाभ्युदयाविदुलशीतवानीरवंजुलाः । मंदः स्वल्पे मंदगते मूर्खे विरिणोगिणाति विश्वप्रकाशः । निंदतीत्यादि । हे माधव
सा राधा त्वद्विरहे हृद्विश्लेषे चंदनं निंदति । अथ च इंदुकिरणं । अनु चंद्रकिरणान् कीकल्प अधीरमस्तकं खेदं दुःखं विंदति प्राप्नोति । मलयसम

यमुनातीरवानीरनिकुंजे मंदमास्थितं । प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी ॥ निंदति चंदनमिंदुकिरणमनुवि
दति खेदमधीरं । व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं ॥१॥ सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया त्वयि लीना

रं मलयपर्वतसंबंधिवातं व्यालनिलयमिलनेन व्यालानां सर्पाणां निलयो निवासः स्पंदनवृक्षस्तस्य मिलनेन संसर्गेण गरलं विषपदम्
मिव कलयति मन्यते । चंदनवृक्षस्थितसर्पैः पीतोच्छिष्टाः एते मलयवायवः तस्य विषमयाः कथमन्यथा शरीरमपर्क... जनयतीति
मन्यत इति भावः । ... मन्यत इत्याह अन्यसमभावे विशेषणमाह । दीनेति । दीना दुःखिता । तथा च दुःखितस्य दुःखहेतुरोपदः स्वापद भवती
ति भावः । पुनः कीदृशी भावनया ध्यानेन त्वयि लीना मग्ना । कस्मादिव मनसिजस्य कामस्य विशिखा बाणास्तेभ्यो भयादिव । व्यालो भुजंगमे क्रूरे श्वापदे दुष्टे

गी॰ टी॰ २६ मास्वहृदयमर्म्मणि॥ स्वहृदयरूपे मर्मस्थाने विशालं सजलनलिनीदलजालं जलसहितं कमलिनीपत्रसमूहं वर्म कवचं करोति। किमर्थमित्यत्र
चिरलं यथा स्यादेवं निपतितो यो मदनशरः कामबाणस्तस्मादिव भवदवनायैव भवतो रक्षणायैव। तस्या हृदये त्वं सर्वदा तिष्ठसि अतो विरलनिपतितैर्मद
नशरैस्ते पीडा माभूदिति प्रियतमोपरि स्नेहसन्नाहमिव साकरोतीति भावः। हे प्रियतम किं कृत्वा वर्म अविरलनिपतितमदनशराद्भवदवनाय स्वरक्षणाय भवद
वसम्पद्यमानमिवेति व्याख्यान्ति अवनं रक्षणं प्रीतिर्वा इति विश्वप्रकाशः। सा कुसुमशयनीयं पुष्पशय्यां करोति रचयति। कीदृशं। अनल्पविलासक

अविरलनिपतितमदनशरादिव भवदवनाय विशालं। स्वहृदयमर्म्मणि वर्म्म करोति सजलनलिनीदलजालं २ २
कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं। व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयं
मू॰ ३

लायां बह्वतरक्रीडाकलायां कमनीयं काम्यं यद्देवस्यागतिर्ज्ञातुं न शक्यते को वेद कस्मादेव भवानागच्छतीति सा शय्यां कुसुमशय्यामारचयत्व
न्मार्गे दत्तदृष्टिरेव तिष्ठतीति भावः। किमिव करोति कुसुमविशिखः कामस्तस्य ये शराः कुसुमरूपास्तेषां तल्पं शय्यां यत्तत्स्वरूपं व्रतमिव परि राम
रम्भसुखाय तवालिङ्गनजन्यसुखप्राप्तये करोति। तल्पं च शयनीयं स्यात्तल्पमट्टकलत्रयोरिति विश्वप्रकाशः। एतैस्त्रिभिः पदैरुद्वेगाख्यापञ्च २६
म्यवस्था कथिता। तल्लक्षणं चोक्तं प्राक्॥

वहतीत्यादि। सा उदारं आननकमलं श्रेष्ठं मुखपद्मं वहति धारयति। कीदृशं वलितो न्मार्गे प्रेक्षणाय तिर्यक्प्रसारितो विलोचनेन नेत्रप्रवजलधरो मेघो य
त्रतादृशं। अत्र निरंतराश्रुवर्षित्वं नेत्रयोर्जलधरत्वेन रूपितं। किमिव। विधुमिव चन्द्रमिव। कीदृशं विधुं विकटाः करालाः विशाला वा ये विधुंतुदस्य
राहोर्दन्तास्तैर्यद्दलनं खण्डनं तस्माद्गलिताः प्रच्युता अमृतस्य धारा यस्मात्तादृशः। अत्र मुखस्य विधुना नेत्रजलस्य सुधामृतधारया साम्यं रूपकाद्वाक्यार्थोपमा बोध्या
विकटः स्यात्सुन्दरे घोरे विशाले विकरालयोरिति विश्वप्रकाशः। तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुद इत्यमरः। इयं चोन्मादाख्या सप्तम्यवस्था

वहति च वलितविलोचनजलधरमाननकमलमुदारं। विधुमिव विकटविधुंतुददन्तदलनगलितामृतधारं
मू॰ ४ विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतं। प्रणमति मकरमधो विनिधाय करे च शरं नवचू
तं मू॰ ५

तदुक्तं शृङ्गारतिलके। श्वासप्ररोदनोत्कम्पस्तम्भो दूरतोऽपि व्यापारो जायते यत्र स उन्मादः स्मृतो बुधैरिति। किंच रहसि एकान्ते कुरङ्गमदेन कस्तू
र्या भवन्तं लिखति। कीदृशं असमशरभूतं कामस्वरूपिणं। ततः करे नवचूतांशरं निधाय तेऽश्रासनस्थाने मकरं विनिधाय अधो वा प्रणमति। कुसुमशरा
मकरवाहनस्त्वमतः सोऽपि नेन चूतपुष्पमयेन शरेणाकीर्णमितीमां मा सन्तापयसीति प्रणामस्फूर्त्या उचितमिति भावः। मृगनाभिर्मृगमदः कस्तूरी गन्धशेखर इ
तिहारावली। मदो रेतसि गर्वे हर्षे च कस्तूर्यां मद्यदानयोरिति अभिधानान्तरे॥ ॥

ध्यानेत्यादि। ध्यानं चिंतनं तल्लयो लय स्ताप रल्लीन इव अतिशयेन दुरायं दुःखेन प्राप्य भवंतं पुरो अग्रे परिकल्प्य सा राधा विलपति शतहयं कालं याभिः सह क्रीडाकृतवान सि तं वृंदावनाद्यं रमयते वृंदावनात् गच्छति। भाग्यवशाद्यागोप्यति निर्भर्त्सनात्कोवदयुनर्याती पाइयाम प्रकरण पहम गतिपस्थापुरःस्थितोप्य यमाभालिंगनादिना न संभाषयतीति विषादं तिविषादं प्राप्नोति। पुनः कथमयं वशः स्यादिति विचार्य रोदिति। पतीनायिकानां नायकस्य परतो रोदनपरमावशीकरणोपाय इति तदुक्तं तु दितमम्भ्र योषितां विग्रहे च्छिति। पुरस्वादादनोपमदोदासमालक्ष्मा गच्छतंमामयमनुनेष्यतीत्यभिप्रायेणाचु वतिस्थानांतरं गच्छति। पश्चाद्ध्यानेनैवान्तेगं परिकल्प्य तापं मुंचति। किलकिंचितारव्य भावांह्राव तदुक्तं दशरूपके। क्रोधाश्रुहर्षभीत्यादेः संकरः किं

ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापं। विलपति हसति विषीदति रोदिति चंचति मुंचति तापं॥ स

दमिदमपि निगदति माधव तावक शरणायातिता ३ त्वमपि विमुखमयि सपदि सुधानिधिरपि तनुते तनुदाहम्॥ ॥

लकिंचितमितीइयमप्युन्मादावस्था च। अलंकारस्त्विह दीपकं। तदुक्तं काव्यप्रकाशे। सैव क्रियासु बह्वीषु कारकस्येति दीपकं। अस्यार्थः बह्वीषु क्रियासु कारकस्यैवं सकृद्वृत्तिरेव दीपकमिति। प्रतिपदमित्यादि। प्रतियदं प्रत्यक्षरं तन्तनी पदं शतिइति निगदति। हे माधव तावकं शरणोहं यतिनास्त्वयि विमुखे विश्लिष्टे सति सुधानिधिरपि अमृतनिधिश्चंद्रोपि तनु दाहं मच्छरीरं तापं तनुते विस्तारयति। लक्ष्मी माया लक्ष्मपक्षवः स्वामी चंद्रश्च समुद्रोत्पन्नत्वाल्लक्ष्म्याः सहोदर इति त्वयि निकटस्थिते सति मयत्याश्च पि मे किमपि कर्तुं न शक्तो। तिलयि प्रतिकूले च सति स्वभगिनी मायात्वं मयि स्मरतु। यानिक्षिपे रामम् तनुदाहं तनुतइति माधवपदेन ध्वनितं। सुधानिधेस्तापकारित्वविरुद्धमिति विरोधनामायमलंकारः॥ १ २ ३ ४ ५ ६ ७ २७

श्रीजयदेवेत्यादि। जयदेवभणितं जयदेवकवितं मतिशयितमितियदिमनसानटनीयं। नर्तितंव्यं तदाइदं हरिविरहे गात्राकुलावाकुला या वल्लव युवतिस्तस्या स्तवं दु तिस्तेन प्रेषितां तसा वचनं पठनीयं। इयं विरहोत्कंठिता नायिका तल्लक्षणा पोक्तं। माधवो विनाकुत्रापि न निर्वृतिं लभते इत्याह। त्वं विना मद्गुणदितस्थास्त्व हिरहे आवासमंदिरं विपिनायते। प्रियसखीमाला पिप्रियसखीपंक्तिरपि जालायते। आनापदवदाचरति। यदात्वद्विरहे पुस्खासहीस्तु तयोजीवितमपि तदुक्तं तां भवति तदा सखाभिर्मिर्वर्ण्यते इति स्वच्छंदं अपवहार प्रतिबंधकतया तां अपि जालवदाचरंतीति भावः। अथ तापोपि विरहजनितः। तेनापि पिल्ल सितनिःश्वसितेन निस्तासेन दावदहनज्वालायादावाग्निशिखायाः कलापः समूहः सद्वाचरति। अपरोपिदावाग्निवायुना

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्। हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम्॥ ८ आवासो विपिनायते प्रियसखीमालापि जालायते तापोपि श्वसितेन दावदहनज्वालाकलापायते ९ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितम्॥ १

प्र १

प्रचंडो भवतीति ध्वनितं। सापि हरिणी हरिसायते हरिणीवदाचरति हा कष्टं कथं कंदर्पोपिकामोपि परमानंदजनकोपि त्वद्विरहे यमायते कृतांतइवाचरति किं कुर्वन् शार्दूलव्याघ्रस्य विक्रीडितं क्रीडां कुर्वन् यथा हरिणी वने समंततः पदे पदे दावाग्निज्वाले पीडिता व्याघ्रेणाक्रांता। गेच्याथ जालवितते पश्यंती दिशदिश चकितविलोकमानाक्वापि न निर्वृतिं लभते तथेयमतिव्याघ्ररूपेण कामेन त्रासिता सखीवाधा वासपुष्पापि निर्वृतिं न लभते इति भावः। शार्दूलविक्रीडितनामकमिदं छंद इत्यपि ध्वनितं। अत्र प्रथम पदे उद्वेगावस्था कथिता तल्लक्षणं वाक्य पाकशेषे चाष्टमी व्याधिवस्था कथिता तदुक्तं रभोगादि सुधाकरे अभीष्ट संगमाभावाद्व्याधिः संतापलक्षणः। अत्र संतापनिश्वासौ शीतवस्तुनीवना। नात्र भाषणं प्रश्नेनेहानेन श्वाणाति वर्तिता शाद्वलोरादे

वि १ ---------- त्रिकि

विरचयर २

सा३

गी·टी· २८ पुनरपि वा विरूपामष्टमीमवस्थां प्रपंचं गीतेन कथयति। स्तनेत्यादि। गीतस्यास्य देशाखरागः गीतार्थस्तु हे केशव तव विरहे सा राधिका अनुकंपायां कः यथा स्तनविनिहितमपि स्तनयोरुपरिहितं दारस्त्रा जनेर्धुतमपि उदारमुत्कृष्टहारं अतिभारं मनुते तत्र हेतुगर्भविशेषणमाह। कृशतनुरिति कृशा तनुरंगयस्याः सा। किंच सा मलयजपंकं वपुषि देहे शंकसा कामसहितं यथा स्यात्तथा एवंविधमिव पश्यति। कीदृशं सरसमसृणामपि आर्द्रं चिक्कणमपीत्यर्थः। पंकं कर्दममयापयोरीति विश्वः मसृणोंकं शर्करिण इति मेदिनीकारः। किंच मातस्मितायवनं श्वासमवायुं वहति धारयति। कीदृशं अनुपमं परिणाहं उपमारहितः परिणाहो दैर्घ्यं यस्य तादृशं। कमिव मदनदहनमिव कामाग्निमिव कीदृशं सदाहं दाहसहितं परिणाहो विशालते पमनः स्पंजावतां बाध्यवस्याकथि

हे

तेकृशतनु

देशाखरागे रूपकताले। स्तनविनिहितमपि हारमुदारं सा मनुते कृशतनुरिति भारं २ राधिका तव विरहे केशव। ध्रुवपदं। सरसमसृणमपि मलयजपंकं

प्रपति : वि ।पश्यति विषमिव वपुषि सशंकं ३ श्वसितपवनमनुपमपरिणाहम्। मदनदहनमिव वहति सदाहम्। दिशि दिशि किरति सजलकणजालं नयन

ब

ननलिनमिव विगलितनालम् ४

नातल्लरणं चोक्तं शकृ। सा दिशिनयननलिनं नेत्रपद्मं किरति क्षिपति कीदृशं विगलितनालं विगलितं त्रुटितं नालात् विगलितं नालं यस्मैतिवा कीदृशं सजलकणजालं जलकणजालेन अश्रुजलकणिकासमूहेन सहितां अत्रैवशब्दो वा कालंकारे अत्र नेत्रं नलिनरूपेणोक्तम् तिमितास्तुवोधिता तेन जडीतानवम्यवस्था ध्वनिता। तदुक्तं रसार्णवसुधाकरे यत्र ध्यायति निःसंज्ञजडता साधकी तिंता। अत्र सशीनभिजत्व वेवार्यशिथिलांगता चकारडहू कृतिरसंभनिःश्वासकृशतादयइति॥ ॥ राम २८

दिशि२ नलि२ त्वं२

त्रा।

किंच सा नयनविषयमपि चक्षुर्गोचरमपि किशलयतल्पं नवपल्लवशयनीयं विहितोहुताशो येनसः विकल्पः संशयो यत्र तादृशं कलयति अत्र किशलयेषु अग्नित्वसंशयः कृत्वा दिप्यमानधर्मदर्शनादग्नित्वसंशयः इयं चोद्वेगावस्था लक्षणमुक्तं। सा सायं संध्यासमये पाणितलेन करतलेन कपोलं न त्यजति कीदृशं अलोलं अचंचलं दिवसकृत्ययाकयं विनीतो रात्रिकृत्यगायमाना कथं नेतव्येति कपोले पाणिं कृत्वा सोयं चिंतयतीति भावः। किमिव बालशशिनमिव हृतायाचंद्रमिवा सुरवाहस्पकरालेनच्छन्नापाटुलहरूपमालतया विरहविपांडुतायाद मुखस्पहिता पाचंद्रसाम्यं इयमपि जडतावस्था। किंच सा निकामं अतिशयेन हरि हरिति हरिरिति जपति। कीदृ विरहेण चाहेन्नेषणाविहिताविधात् मारवे मरणाय यासे वाकथयथा स्यात् सकामं साभिलाषं यथा स्यात्तथा अभिला

॥ नयनविषयमपि किशलयतल्पं कलयति विहितहुताशनकल्पम् ५ त्यजति न पाणितलेन कपोलं बालशशिनमिव सायमलो

॥लम् ६ हरिरिति हरिरिति जपति सकामं विरहविहितमरणेव निकामं ७ श्रीजयदेवभणितमिति गीतं सुखयतु केशवपद

मुपनीतं ८

षाहिषु नवस्वस्थास्वतीतास्वपि दैवोस्मे मा लब्धमरणास्यायापिद्दत्पादशम्यवस्थया वश्यंभवितव्यमिति निश्चित्य प्रपन्नानां त्वं शरणं हरिरित्युच्चतडतिको वेदप्रसन्नः सन् अन्यपि जन्मन्यागत्य मेलं शहरिष्यति भावः। यासु तथा पि अन्ते या मतिः सा गतिरिति जन्मांतरेपि स एव वल्लभो भूयादिति साभिलाषं नामान्तरं विहाय हरिहरिपि वजयतीति भावः। विहितं तत्पत्रादिकं मणिक्रः कर्तव्यमिति। श्रीजयदेवेत्यादि। इति अमुनाप्रकारेण जयदेवेन भणितं वर्णितं

त्वं२ गीतं सुखयतु अर्थात् श्रोतॄन् गायकांश्च कीदृशं केशवपदमुपनीतं प्रापितम्॥ ८

४

गी·गो· सारोमांचतीत्यादि॥ साराधारोमंच्च...॥ च्चंचयतिउद्भमयतीत्यर्थः॥ पद्मारोमांचोयस्याःसातिच्चर्शादित्वादच॥ श्रपरेरोमांचः सइवाचरतिरोमांचतितियद्वारो
२१ मांचयदरोमांचवतीयस्यंलक्षणायातथाचाउंजस्वावाचरतीत्यादिवत्‌रोमांचवतीवाचरतीत्यर्थः॥ च्चनेनाभिलाषःकथितः॥ सीत्करोतिसीत्कारंकरोति॥ च्चनेन
चिंतास्मृतिःकथ्यते॥ च्चथवावलयतिसम्पूर्णःसुंदरेस्वपादिनायकगुणान्विशेषेणालयति॥ च्चनेनगुणकीर्तनमुक्तं॥ उत्कंपतेकथविरहदुःखमुदयमिति
मयुक्ताभवतितान्यतिग्लानाभवतिध्यायतितवध्यानंकरोतिरसेविशेषणोरुद्देगावस्था कथिता॥ उद्भ्रमतिक्रीडादिस्थलेनिर्दिशतोभ्रमति॥ च्चनेनप्र

सारोमांचतिसीत्करोतिविलपत्युत्कंपतेताम्यति ॥
ध्यायत्युद्भ्रमतिप्रमीलतिपतत्युद्यातिमूर्छत्यपि ॥१८॥

लापःकथितः॥ प्रमीलतिध्यानकल्पितत्वदालिंगनादिजन्यसुखभावेनचक्षुषीनिमीलयति॥ च्चनेनोन्मादःकथितः॥ पततिकार्श्येनस्थातुमशक्य राम
तयाभूमौपतति॥ पश्चाद्भावनयात्वांदृष्ट्वाकथंकथमपितुद्यातित्वदभ्युद्गमंकरोति॥ च्चनेनव्याधिःकथितः॥ ततोमूर्छतिमूर्छांप्राप्नोति॥ च्चनेनज २१
डताकथिता॥ क्रियादीपकोयमलंकारस्तल्लक्षणमुक्तंप्राक्॥ ॥

२१

ननुजडतापर्यंतावस्थायदिजातैवतदाकिंमहतेनेत्यतच्चाह॥ एतादृशीत्यादि॥ हिस्त्वंवैद्यप्रतिमस्त्वंवैद्यावत्स्वनीकुमारीतत्प्रतिमस्तत्सदृशोगःतादृशपातनुज्वरेप्रा
नोःकमास्यज्वरेत्वयादिप्रसीदसितदासावरतनुःकमनीयदेहातस्मात्‌तवश्रृंगाररसात्‌किंनजिवेत्‌च्चपितुजीवेदेव॥ च्चन्यथात्वंचेन्नप्रसीदसितदातयाह
मकोपिपतत्कःस्वल्पयायाइत्यर्थः॥ सप्रतिमूर्छितायातस्यावज्ञामपास्यत्याह॥ स्तवेष्टयेवसर्वेषुव्यवहारोभवतिसोपितयापत्यत्कव्यइत्यर्थः॥ च्चन्यच्चापिज्वरेज उ
शीतेनया रोमांचवतिशीतादिनारोमांचवानिवाचरतिवेदनयासीत्कारंकरोतिविलपतिमोहाद्यत्किंचिद्वदतिउत्कंपतेकंपयुक्तोभवतिताम्यतिविह्वलोभवतिध्यायति
मूर्छतिमूर्छांप्राप्नोति॥ एतादृशपतनुज्वरेमहातिसंनिपातिकज्वरेकस्मासित्वंवैद्यप्रतिमस्यप्रसादेनरसास्वादादितोज्वरः॥ किंनजीवेत्‌॥ च्चपितुजीवेदेवनतुमा

एतादृशपातनुज्वरेवरतनुर्जीवेन्नकिंतेरसात्त्वंवैद्यप्रतिमप्र
कृतकोपितन्मोः सीदसियदि...न्यथानांतकः॥ ॥ ॥

घ

पातिकज्वरेसहसारसदानंदकादिभिर्निषिद्धमित्यतच्चाह॥ च्चन्यथेति॥ अन्यथाच्चन्यप्रकारेणासंहितामार्गेणाहल्लकःवैद्यकानांच्चस्ति क्रियाविशेषेहत्य
यदीतिलोकेप्रसिद्धःसर्कः॥ संक्षिप्तप्रक्रियायाउपचारःक्तोविशेषोनिरसदानमुचितमेवेतिभावः॥ क्वचित्त्वनोन्यथानांतकइतिपाठःसदान्यथायदिनाप्रसीद
सितदात्वत्तवापेन्द्रपात्तकोनच्चपितुत्वमेवांतकइत्यर्थः॥ रोमांचतातपत्रच्छितामसास्यानेच्चापित्रपयाच्छायस्वेतायेलापः॥ रसोगाधरसेस्वादेतिकोदोविषरा
गेयोः॥ श्रृंगारादौद्रवेवीर्यदेहधात्वंबुपारदे इतिविश्वकाशः॥

च्चा२

गी·गी ३०

स्मरातुरामित्यादि हे देवातवैघहद्युद्देवतानां योवे वावसिनी कुमगोत्रदूतानां हृद्यमनोज्ञं स्मरातुरां स्मरेणकामेन आतुरां उन्मत्तदंगसंस्पर्शवर्यं द्रंमतातमा त्रसाधां राधां विमुक्तवान् त्यक्तवान् कुरु मेनक शेषिा आता हउपेंद्र त्वंवज्रादपि कुलिशादपि दारुणोसि कठिनोसि यतो वज्र भिंदुराकिंततदंगसंबंधाद्य थसति तन्नविश्लेषेसतेपवत्य थयसातिवज्रापेक्षया पितेदारुणात्वमिति भावः। उपेंद्र वज्र नामकं वेदं छंदस्तकेणानुष्ट्नरत्नाकरे। उपेंद्रपद्राम तमाततो गोऽडति। ननु शीतोपचारैर्वा तनुज्वरशांतिर्भविष्यतीति। किं स्मयेत्पत आह। कंदर्पेत्यादि। अहो आश्चर्यं अस्याः स्मितस्वित चंदनं चंद्रमा कम लिनी चिंतास्तु चंदन चंद्रयष्टिनी वाताः स्वापिसस्विभिः। क्रियमाणा सुसंताम्पतिग्लानिं प्राप्नोतिकीदृशाः कंदर्पज्वरेणायः संज्वरः संतापस्तेनानु

स्मरातुरां देव नवे घातद्यद्वदंड मङ्गानमनमा च साध्यां विमुक्तवानकुरु षेन राधामुपेंद्र वज्रादपि दारुणोसि ३ कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमाकमलिनी चिंतासु संताम्यति ३ किंतु क्लांतिवशेन शीतलतनुं त्वामेक मेवप्रियं ध्यायंती रहसि स्थिताकथमपि क्षीणाक्षणं प्राणिति ४ ७२

तनोस्तु यदेहाया विरोधोयमलंकारस्तन्न्यत्क्षणामुक्तं प्राकाननं ताह्रशसंतापे कथं जावतीपत आह। किंत्विति हे ईन प्रभोत्वांस्वमेवप्रियं शीतला ग्रम
तुं शीतलातनुंयस्मात ध्यायती सती क्षणा प्राणितिजीवतिकी हृशी उक्ता तिवशाउक्रातः प्राणोऽक्रमणास्यवशात् आयत्तात् नहेतु गर्भविशेषणमाह। हो ३०
शाक्षशीतत्वाच्च संताप सर्वांगस्पर्श ध्यायती संप्रतिजीवतीतित्वयाऊदीतिगंतव्यमुनः क्षतस्यादर्शनमपि तेदुर्लभं भविष्यतीति भावः। संतापसंज्वरसमावि
त्यमरः। इनः सूर्ये नृपे पत्यावि इति विश्वप्रकाशः॥

न्वियत्कालं यथाजीविताततत्प्राघे पिजीविष्यतीत्यत आह। क्षणमपीति अनयाराधया ते विरहः पुरा त्वत्संगदशायां क्षणमपि नसेहे ... हेनमोरः। कोह
न्वियत्कालं यथाजीविता ... पिज्ञीविष्यतीत्यत आह। क्षणमपीति अनयाराधयाते विरहः पुरा त्वत्संगदशायां क्षणमपि नसेहे न सोढः पिजगदाश्वरं मुखारविंददर्शनप्रत्यूहाभवत्
शानपनयायन्निमीलननिमेषमनपिन्नयादुःखितयाके मिति धाचा चक्षुषोर्निमेषः सृष्टोयदक्षणमपि जगदाश्वर मुखारविंददर्शनप्रत्यूहा भवती
तिखेदयुक्तयेतिभावः। अनया खिविशवरहोत्कं थस्मिति श्वसिष्यति जीविष्यतीत्यर्थः। किंकृत्वा पुष्पिताग्रां पुष्पितमग्र भागो यस्याः तांह्रशीं रसालशा
खामाम्रशाखां विलोक्य हहा ... भविष्यामि। पूर्वमेवमानाछंदोपि चंदं पुष्पिताग्रा नमकमिति धनितात्तल्लक्षणात्तदुक्तं रत्नाकरे। अयुजि न

क्षणमपि विरहः पुरा नसेहेनयननिमीलनखिन्नयायया ते श्वसिति कथमसौ रसालशाखां चिर
विरहेण विलोक्य पुष्पिताग्राम् इति श्री गीतगोविंदे स्निग्धमाधवो नाम चतुर्थः सर्गः॥ ॥

पुगरेफतोपकारो युजि वनजौ जरगाश्च पुष्पिताग्रेति। स्निग्धो राधा विरहकथाश्रवणेन स्नेहवान्माधवो यत्राहशः। अङ्कश वृंशाखीर्थ विचारवातुरीकृका
व्यरसिकव्यसनेह्निन्वयः तथापि ... समग्रोत्सवोवलाहि धात्मस्मान्यवमापन्नदः इति श्री महामहोपाध्याय श्री शंकरमिश्र विरचितायां श्री शालिनाथ कारितायां रसमंजरीनामधेयायां गीतगोविंदटीकायां चतुर्थः सर्गः॥

कू

गी. गो. ३१ अहमिहेत्यादि। अहं इह निकुंजे वसामि तिष्ठामि। त्वं याहि राधामनुनय परिमांत्वय केन मद्वचनेन न केवलं अनुनयेता मनयेयाः अनियमात् इत्युक्त प्रकारे
णामधुरिपुणा इति एवं प्रकारेण नियुक्ता आज्ञप्ता सखी स्वयं प्रपञ्च मम राधा इदं वक्ष्यमाणं जगाद उवाच न [illegible] प्रकारेण मधुरिपुणा इति एवं प्रका
रेण इति किं च राधायाः हि गत्वा मद्वचनेन च त्वा अनुनय कृता परवशेन मया साक्षाद् कर्तुं न शक्यते तो माधवेनैवमुक्त मित्युक्त्वा त्वमनुनयेति भावः। तावमदंतिक
मानयेयथाः। आनय। ननु कुत्र मया नेयेत आह। अहमिति। अहं इह निवसामि इहैव निकुंजे हताशाली कुमाराणि तिष्ठामीत्यर्थः। यन्मखी जगाद तदेव ग
तिनकथयति। वहतीत्यादि। गीतस्यास्य देशिवराडी रूपकं तालेताल कृणामुक्त धाकु गीता यासकृहे सरि वनमाली कुसुमः सीदति अवसन्नो भवति। के

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः इति मधुरिपुना सखी नियुक्ता स्वयमिदमेत्य पुनर्जगा
द राधां वराडी रागे वहति मलयसमीरे मदनमुपनिधाय स्फुटति कुसुमनिकरे विरहिहृदयदलनाय। तव विरहे वन
माली सखि सीदति ध्रुवपदे दहति शिशिरमयूखे मरणमनुकरोति। पतति मदनविशिखे विलपति विकलतरोऽति

सति। मलयसमीरे मलयाचलसंबंधिवाते वहति सति कुसुमनिकरे पुष्पसमूहे विरहिणां हृदयदलनाय विदारणाय स्फुटति विकसति। किं कृत्वा मद
नकामउपनिधाय समीपवर्तिनं कृत्वा तथा च कुसुमनिकरे ववाणां तत्सन्निहितनकामन विशदाणां हृदयविदोरणाय स्थितिभावः। किं च शिशिर मयूखे हि
मकरे दहति सति मरणमवस्था अनुकरोति। मरणावस्थायाया इत्यामूर्छादि तया चेष्टतां स्वीकरोति। अथ च मदनविशिखे कामवाणे पतति सति वि राम ३१
कलतरो विह्वलतरोऽति विलपति। अतिशयेन विलापं करोति॥

किं च समधुपसमूहे भ्रमरसमूहे ध्वनति सति गुंजति श्रवणौ श्रोत्रे हस्ताभ्यां अपिदधाति मुद्रयति। अथ च निशि रात्रौ मनसि चिंतितं रुजं पीडां उपयाति प्राप्नोति कि
हृशे मनसि वल्लित उपत्तो विरहो यत्र ताहृशे। किं च विपिनवितानेकांतारे वसति तिष्ठति। ललितं मनोहरं धाम मंदिरं त्यजति धाम देहे गृहे रश्मौ जन्म प्रभावयोरि
ति स्वप्रकाशः। किं च मधरणि शयने भूशय्यायां लुटति तिवनामहप्राणे स्वविरहोपचये हेरा केशी इव पंच बहुवारं वारं विलयति विशेषेण जल्पति। श्रीजयदेवकवे भ

ध्वनति मधुपसमूहे श्रवणमपिदधाति मनसि वलितविरहे निशि रुजमुपयाति
३ वसति विपिनविताने त्यजति ललितधाम लुठति धरणिशयने बहु विलयति तव
नाम ४ भणति कविजयदेवे विरहिविलसितेन मनसि रभसविभवे हरिरुदयतु
सुकृतेन। ५

ति कथयन् स्तक्तं तद्भणितिसति णिपजातं तेन मनसि अर्थात् प्रपतां सुश्रवतां च हरिः कृष्णः उदयतु आविर्भवतु की हृशे मनसि रभसस्य कृष्णकीर्तनविषयको त्सा
हस्य विभवः प्राचुर्यं यत्र ताहृशे। की हृशः हरिः विलसितेन विरहिणी विलासेन विलासेन उपलक्षितः वक्रगत्यात्स्यसकं जातयोमिरूपतया स्थितस्य न केन
पि सह विश्लेषोऽपि नुलीलया तस्य विरहि विलसितेन तत्रशेषणाइतासू नैणा त्रतीया॥ ॥ ६ ६ ६ ६ ६ ६

८३

गी गो ३२

पुनः श्रीकृष्णस्य राधाविषयिणीमुत्कंठां श्लोकेनाह। पूर्वं पेत्रपादि हे सखि माधवः कृत्ता भूयः त्वदीयौ यो कुंभाविव कुचौ स्तनौ तयोर्निर्भरं परिरंभमालिंगनं त
देवा मन्त्रो मा कृष्णं वांछति सान्द्रानन्दमदो हाविर्भावजनकत्वेन तत्कुचं कुंभस्य सेमाकृत्वेन रूपणा केदं क्लिष्टा भावनांच परमानदावा प्रेरेव माकृत्वा। किं कुर्वन्तु स्मिन्न
वनिकुंजरूपेमन्मथस्य कामस्या विष्ठानभूते महातीर्थे निशं निरंतं त्वामेव इष्टदेवतां ध्यायन् तवैव आलापा एव मंत्रा मनेषा अवलिः पंक्तिं जपन्। महातीर्थत्वे हेतु ठ्री२
गर्भविशेषणमाह। एवं स्मि तिपूर्वं पुरा पत्र त्वया सह भ्रमत्वया सह रतियत्ते कामस्य तु वना लिंगनादि रूपाः सिद्धय आसादिता माधवेन प्राप्ताः तथा व उरितिवा
छिज फलप्रदत्वेन महातीर्थत्वादिति वा ह्वं। अन्यो पि साधकोऽस्तां मा कुंवांछन् पत्र सिद्धिः पूर्वं प्राप्ता तित्तैव सिद्धेन्कुं जादिमहातीर्थे कस्या श्चिद्देवताया मंत्रा

(स) सर्वंपत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः॥ ध्यायं स्त्वा
मनिशं जपन्नपि तवैवालापमंत्रावलीभूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति॥ ॥ ॥

वलीं जपति तामेव [illegible] देवतां ध्यायति। अत्रावलीपदोपादानात् मालामंत्रत्वं प्रतिपादितं तत्प्रयोजनस्तु सिद्धेर्सं सिद्धत्वादि ऋणधनादिशोधनमंतरेणैव फ
लसामर्थ्यं प्रतिपादनं। तदुक्तं योगरत्नावल्यां स्वप्नप्राप्तेरुपादनेमालामंत्रार्थे चवैदिकेषु च सर्वेषु सिद्धाद्धीन्वेशोधयेदिति। निकुंज त्वनेन निकुंजादिमहातीर्थे
मंत्रजपे कृतिति फलसिद्धिर्भवतीति ध्वनितं। तदुक्तं मंत्रमंजूषायां। गृहे गोष्ठे वनारामनदी नागसुरालयेषु समीपवागुरोः सिद्धिः शीघ्रस्यादुत्तरोत्तरइति॥ ॥मुक्ति राम ३२
(ज) :कैवल्यनिर्वाणश्रेयोनिश्रेयसामृतमित्यमरः॥ ॥

किंचित्प्रसादोन्मुखीं राधां दृष्ट्वा संकेतगमनाय तत्परयितुमाह। धीरसमीरइत्यादि। गीतस्यास्य गुर्जरीरागः एकतालीतालो गीतार्थस्तु हे नितंबिनि प्रशस्तनितंबवति त
२२ दयेश्वरं कृष्णं अनुसंगछ गमनविलंबनेगमनेकालक्षेपमाकुरु कीदृशं तं हृदयेश्वरं अभिसारे अभिसरणस्थाने गतं पुनः कीदृशे अभिसारे रतिसुखस्वरूप
सुखसारमुत्कृष्टं यत्र तादृशे। पुनः कीदृशं मदनमनोहरवेषं मदनस्य कामस्येव मनोहरं चित्तहरणं कमोवेशोलंकारो यस्य तं वेशो वेश्यादरहेपांको नेपथ्ये ग्रहमात्रकइति वि
श्वप्रकाशः अल्पवेषेण नेपथ्ये अभिसारस्थलमेवाह। धीरसमीर इत्यादि। यमुनायास्तीरे वनेवनमाली वनमालाशाली कृष्णो वसति। कीदृशे वने धीरो वा पुर्यत्र
नर२ तादृशे। अत्र धीरइत्येनेन वायोर्मंदत्वं यमुनातीरइत्येनेनशैत्यं वनइत्येनेन सौगंध्यं कथितं। किं दृशो पनमालीगोपीनां पीनपयोधरपरिसर्पणलालनपरातस्य
मर्दनयत्करयुगं हस्तपुगलं तेन शालितुं शोभितुं शीलं यस्य तादृशः। समीरमारुतमरुज्जगत्प्राणसमीरणा इत्यमरः। धीरः पंडितमंदयोरिति धरणिः। पदिमद्रव

गुर्जरीगो। रतिसुखसारे गतमभिसारे मदनमनोहरवेशं। नकुरु नितंबिनि गमनविलंबनमनुसर तं हृदयेशं। धीरसमीरे यमुनातीरे वसति वने वनमाली गोपी
पीनपयोधरमर्दनचंचलकरयुगशाली॥ ॥ध्रु॥ नाम समेतं कृतसंकेतं वादयते मृदु वेणुं। बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुं॥ ॥ ॥ = हृत२

नेन प्रत्येषितदाकृष्णेन वाद्यमानं वेणुमेवाकर्णयेत्याह। नाम समेतमित्यादि। नामसमेतं यथास्यात्त्वन्नामाक्षरसहितं यथा स्यात्। एवं मृदु वेणुं वादयते। हे राधे
प्राणेश्वरि इत्येवं कृष्णेन वाद्यमानाहे राधे स्वर आविर्भवतीत्यर्थः। कीदृशं वेणुं कृतसंकेतं पहाय चमया वेणुर्वाद्यते तदा तत्र त्वया राधामानेयमेवकृतः संकेतो
यत्र तादृशं यह। मया कृतोयः संकेतस्तत्र नाम समेतं त्वन्नामाक्षरसहितं वेणुं वाद्यते आहमत स्मिन्निकुंजे तिष्ठामि राधे त्वरितमेहीति कृष्णेन वाद्यमानो वेणुः
दः तात्पर्यः। किंच तन्वितिसंबोधनेन तनुसंगतत्वद्गात्रसंबंधी यः पवनो वायुस्तेन चलितमागतमपि रेणुं धूलिं बहु मनुते आधिक्यं यथा स्यादेवमाद्रियते। च्यपरे तु
धन्योयं त्वद्गात्रसंगेनामनुतानुपते ऽहमपि धन्योयस्तेन रजसा स्पर्शेपइत्येवं बहु मनुत इति भावः। राकृयो स्त्रियां धूलिः पांशुर्नानेह

जे३ च

गी॰ गो॰ किंचमत्कृतः शयनं शय्यां रचयति। कथं यथा स्यात् यतनेपादिः पिपतति पत्राग्रं गच्छति शतिशंकितं त्वर्हि त्वं भवत्या उपयानं समीये गमनं यत्र तद्यथा स्यात्
३३ कीदृशे पतत्रे विचलितपत्रे यस्मात्त्व आकृति चिह्नि चलति यत्रे इति याउः सम्मुगमप्रवृत्तमेवमच कितनयनं यथा स्यात्तथा कितनयनसहितं यथा स्यात्। एवं तव
पयानं त्वदागमनवर्त्म पश्यति। पत्रे समुर्मुरसंचलत्पायातामेवराणाश्वरीति शंकयाचकितं पंथानं पश्यमीति भावः। पत्रपक्षयदि रोरोतिधरणीः भवदुप

पततिपतत्रे विचलतिपत्रे शंकितभवदुपयानं रचयति शयनं सचकित
नयनं पश्यति तव पंथानं ३ मुखरमधीरं त्यज मंजीरं रिपुमिव केलि
सुलोलं। चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलम् ४

व
यानमित्यत्र सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः॥ गमनोत्कंठितां दृष्ट्वाह मुखरमित्यादि। हे सखि मंजीरं नूपुरं त्यज कीदृशं केलौ सुलोलं चंचलं अतएव वचने भवतीति मंजीरे ला२
व। अधीरं अमंदयत्वात्स्यादेवं मुखरं शब्दायमानं कमिव रिपुमिव शत्रुमिव। रिपुरपि अधीरः उत्तरलो मुखरो वाचालः। केलौ सुलोलो मंजीरो नूपुरो स्त्रियामित्यमरः। निचोलपच्छदप राम
त्साम्यहे सखि सतिमिरपुंजेनांधकारसमूहेन सहितं कुंजं वनं गच्छ नीलनिचोलपच्छदपटं शीलय परिधेहि। मंजीरो नूपुरो स्त्रियामित्यमरः। निचोलपच्छदपटस्त्वरतिव॥ ॥ ३३

ते२२
राधायाः अनुत्कंठां जनयितुमाह। उरसि मुरारेरित्यादि पीनतुंगि पुनः कीदृशे सुकृतविपाके सुकृतस्य पुण्यस्य विपाकः परिणामो यस्मात्तादृशे पुनः कीदृशे उपहितहा
रापितो हारो यया तादृशे रतिविपरीते सुरते विपरीते विपरीतं पुंभावमापन्नं त्वं मुरारेः उरसि हृदये राजसि अधुनेवा जिष्णुसि राजसि तत्र भविष्यसीत्यर्थः एव
केवलं नान्यद्दृष्टा सुकृतविपाके उपहितहारे इति द्वयमप्युरसः तस्यैव विशेषणं तदा तत्र सुकृतस्य विपाकस्त्वं दृशे उपहितो हारो यत्र तादृशे उरसीत्यर्थः। केव
लमानं ... सुकृतविपाके उपहितहारे इति द्वयमप्युरसस्तस्यैव विशेषणं तदा ... विपाकस्त्वं ... उपहितो हारो यत्र तादृशे उरसीत्यर्थः। केवलं नाम यत्र इव ... अपि तत्र विघातारोधाया उपमानान्येव स
तडिदिव विद्युदिव उरसि कीदृशे इव तरलबलाके तरलाश्चंचला बलाका बकपंक्तिर्यत्र तादृशे घन इव मेघ इव अत्र पीतवर्णतया राधाया उपमानान्येव स
सजलत्वं विहितं तदुक्तं पीतावर्षायां विजेयेति। अत्र कृष्णस्य श्यामलत्वेन सजलमेघसाम्यं राधायाः चलहारस्य चचलबलाका पंक्तिसाम्यं राधाया सुतदा

उरसि मुरारेरुपहितहारे घन इव तरलबलाके। तडिदिव पी
ते रतिविपरीते राजसि सुकृतविपाके॥ राराम राम सम॥

नीतवर्णतया पीतविद्युत्साम्यं अत्र यद्यपि वलकायामेव सापः स्थितत्वात् हिक्कात्साप रिवर्तमानत्वात् हारविशिष्टकुचोरस्थलविलसद्बिंबोपमानत्वं तरलब
कपंक्तिविशिष्टमेवोपरिस्थितविद्युतो विरुद्धत्था पि मेवापरिवकपंक्त्यादि भवतितद्युपरि यद्वा च विद्युत् तादृशराधाया उपमानं भवतीत्यद्भुतोपमा बोध्या
श्र२ तदुक्तं दंडिना सर्वयं प्रभासारः समालम्बतिडद्वकविना नवाननं विभाति तितामभूतोपमा बुद्धिरिति। यद्वा तरलबलाकेइत्यपि राधायाः सविशेषणं तथा
चहेतरलबलाके चंचलकामुकोत्स्थः तस्मिन्कोटिकदर्पलावण्ये पदृष्टे समेक्का मुकी सती पुरुषायितमाचरीष्यसीति भावः। बलाका बकपंक्तौ स्याद्बलाका
रा विशकंटिका बलाका कामुकी प्रोक्ता बलाक स्त्रवको मतइति विश्वप्रकाशः॥ ॥
रू२

जं २ ग्र

गी. गो. २४ पुष्पार्पितमुतस्मरोत्संकोकारपितासंप्रति नायककर्तृकृत्कं राजनपित्तु आह। विगलितमित्यादि। हे पंकजनयने सर्वनयनेराधे किशलयशयनेनवपल्लवशय्यां
यां स्मरेण रचितायां जघनं । अपरया कीदृशं जघनं विगलितकोटिकं दर्पलाव शपथ्या ... दर्शनेन स्वयमेव संवलितवसनं ... मुक्ता
पिधानं पवनमावरणं तद्रहितं पुनः कीदृशं । परिहृताहूरीकृता रसनाहृद्दं येन तादृशं पुनः कीदृशं । हर्षस्य आनंदस्य निधानं गृहं कुंभमिव । निधिमिव
रसनाकाचिज्जिह्वायोगितिविस्तरप्रकाशः । हरिरभिमानीत्यादि । हे कृष्णः अभिमानी मनस्वी तथा च एतावतादैन्यं नापि दुःखमत्र जनत्वात त्यक्ता वेदोल्लासं
मेवां चरेदिति भावः । इयं रजनिरपि इदानीं विरामं अवसानं याति । तथा च मम वचनं चलमस्ति कुंजमित्यादि मद्वाक्यं कुरु कीदृशं । सत्वरं तरसाहि

विगलितवसनं परिहृतरसनं घटय जघनमपिधानं । किशलयशयने पंकजनयने निधिमिव हर्षनिधानं ६ हरिरभिमानी रजनिरिदानीमियमपि याति
विराममकुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ७ श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् । प्रमुदितहृदयं हरिमतिसदयं नमत सुकृत
कमनीयम् ८

गमने रचयतीति सत्वररचनं मधुरिपोः कृष्णस्य कामं वांछितं पूरय नायिका वा चाभिसारिका वा गीतानीयात तत्र कृष्णं चरमाणि वामदनानलं सतत प्राया भिसारयति प्रि
या ज्योत्स्नातमस्विनी यानयोग्यं वेषं विभूषणं स्वयं वा भिसरेयात् सा मेव दभिसारिकेति श्रीजयदेवेत्यादि । श्रीजयदेवे कृतहरेः कृष्णस्य सेवा येन तादृशे अपि
रमरमणीयं यथा स्यादेवं भणति सति हे जनाः हरिं कृष्णं नमत प्रणामत कथं यथा स्यात् । प्रमुदितमानंदयुक्तं हृदयं यस्य तादृशं । कीदृशं हरिं सदयं दयासहि गम
तं पुनः कीदृशं सुकृतेन पुण्येन कमनीयं वांछनीयं ॥ ॥ २४

नाकरुणस्वन सदृशी दीर्घामदल्पप्रार्थनातन्मुग
श २ २४ छन्द ४ विफलविलंबनमसोरम्योभिसा + ७

हे वेनापिनापकस्योत्कं तमाह । विकिरतीत्यादि । हे कांते तव मियेम दनकदनक्लांतः मदनः कामः तस्य कृत्कं निजं कदनं दुःखं तेन क्लांतो म्लानो वर्तते मुहुर्वारंवारं श्वासान्संता
पनिश्वासान् विकिरति क्षिपति नासा पुरो नासाग्रे मुहुर्वारंवारमीक्षते ध्यानेनापि प्रियां पश्यामीति नासाग्रदृष्टिः प्राणायामं ध्यायतीति भावः ध्यानसमये नासाग्रदृष्टिः तेन मनसः
काग्र्यं भवतीति नासापुर इत्युक्तं कुंचितमासानाशा ... अथवा पुरो अग्रे सांनिध्ये अनेन वर्त्मना श्रीराधिका आगमिष्यतीति आशया पश्यति ... मुहुः छन्द ४
तन्मयः मुहुर्वारंवारं कुंजे प्रविशति कीदृशं । कुंजं गुंजभ्रमरशब्दयुक्तं । कदाचिदनेन वर्त्मना आगमिष्यतीति ... तस्यां आशायां ...
वारंवारं दुःखं विकिरयथास्यादेवं ताम्यति ग्लानो भवतीति ध्यानविच्छेदे ताप उपताम्यतीति भावः । ... ताम्यतीत्यर्थः ।

सा विकिरति मुहुः श्वासान्दिशः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति । रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते १ ५
लद्वा लघु कोपेन समं सममग्रमधुनाति रमां मुखरस्तं गतो गोविंदस्य मनोरथेन च सम प्राप्तं तमः सांद्रतां कोकिलानां करुणः ॥ ॥ ॥ ॥ ॥ रभसा) मृतं
मुहुर्वारंवारं शय्यां रचयति एतावत्कालं मुहुर्जनरीक्षे यथा ... तां शय्यां रचयत्ना कस्यास्तेनेन ... विफलविलंबनमसोरम्यो
भावः मुहुर्वारंवारं परितः आकुलं यथा स्यादेवं ईक्षते ... दिशः अथ पुनरपि ... अभिस
व रकृराः अभिसारयेमयः ... सूर्यः सममग्रं यथा स्यात् ... यथा स्यादे
धः वं अस्तं गतः ... समं गोविंदस्य मनोरथेन ... मुहुरं नम प्रकु
... गोविंदस्य मनोरथेन सह ... निमीलितो जातः ॥
: कोकानां चक्रवाकानां करुणस्वरेण ... मह्यां सुरुपो
मन्मथेन तव ... मा कुरु अरुणा ... सदृशं कथनं गुणाकर्णमिति ॥ ॥ ॥ ॥ ॥ ॥ ॥

गी २ गीकरुणा गं ५

गी०गो
३५

पुनरप्येधकारस्यापि तैर्वृद्धः कथंने नाभिमारकरास्यातिरस्यत्तामेवाहाश्लेषादिरूहनमसिदंपत्योस्तायाघ्रणो: कः कोनवृ्ठाइव्विमिः श्रोलस्ताक्षमुम्भितोरसस्य सादि
भर्वतास्यथ:। हकीहशोदंपत्योरत्सर्थंगज्यो पारस्पानापिकोन्यनायकंयोहिश्यगतयोः पृष्ठालुमालुात्यामिलितयोः।पुनः कीदृशोः श्रीस्पारदनुश्लीलमनादनुप
स्पाद्यसुवमत्स्नुधारस्पानापिका अन्यनापकु योनखा वक्तदनुपः स्वान्तसस्य कामस्य प्रेद्बोधंउद्रेकस्तदत्तः संभ्रमः समोगाद्रः कामोद्ग गच्छति दनुपोरतारंभः सुर
तारंभसूरतारंभस्तद्दनुप्रातयोर्लज्ञानेदयोः संभाषणोत्तानतोः अन्यनापिक्रानामग्रहेण सुरत्सुनापकनामग्राहं पत्यान्नालापः कथममापंयोजनः कथमपि
भयत्रीतिसुरविशेषणातानतोः (त्पर्थः। एतादून ज्ञरपस्यरज्ञानेपि तुल्यापराधान्यपरस्पर दोषाज्ञानंकुत्तुलस्तासहितः संगास्ससएवाविर्भवतीतिभाव:। अप्र

आश्लेषादनु चुंबनादनु नखोल्लेखादनु :: स्वान्तजप्रोद्बोधादनु संभ्रमादनु रतारंभादनु प्रीतयोः अन्या
र्थंगतयोर्भ्रमान्मिलितयोः संभाषणे जानतोर्दम्पत्योर्निशि को न को न तमसि व्रीडाविमिश्रो रसः॥ ६ ॥

थभमान्तेषस्तत्तु चुंबनेन नोनखच्छेनतन्तः कामोद्रेकात्ततः संभ्रमस्ततो रतं ततः प्रीतिस्ततो रसमावत्र मिति कामशास्त्रसिद्धः क्रमोपिक थितस्त उक्तं भरते
आश्लेषचुंबननखक्षतकामबोधशीघ्रत्वमैथुनमनेनमसुरतप्रबोधा प्रीतिस्ततोपि रसभावनमेककार्यमेवंनितान चतुरा स्मरतत्रमन्त्रइतिनवा श्वविधाहि सुरतम
सुक्तंकामशास्त्रेनत्रचदंत हेतु कृतिनेकशोभ्रहरादिक्रमप्युक्तं तथा च कथं कामशास्त्रे क्रमभंगाय इति वाच्यम् नस्पानिः शंक केलि कामा भिधापक रागम
त्वात्। इह तु परस्परपरनारीचौर्यपरपुरुषपरयोः शंकाकुलत्वेनित्वात्सादिक्रमेगौगसुतारंभउच्चितइतिभावः। नदाहतुदः इर्ष्याकुलस्वीपुरुषनायक ३५
स्पानिः शंककेलिने परागतन्निजितस्मादेतादृशोग्यरो थ धकारेजेगमनगंधेलवेनमरुचिरमिति भावः। दम्पतीजपनी भार्यापतीजायापतीजानीत्रिविन्यमरः।। रागन

क्रो३

त्वरपि१ अंधकारे१

पुनरपिंडि त्रास्यमस्पोत्कंठमाहाससमयेत्यादि हेसखुंगलिससखुभगश्शोभनश्री:क्लमसत्त्वापथ्यपन्नातार्थमांडपै तनुप्राप्नोन्नुकीदृशीतिमिरैमलिनपथिवर्त्मनिसमपचकितांम
पुमहितं चकितंचय थास्याद्द्वेदृशान्नेत्रदीव्ययस्यन्ती संप्रयन्ती। पुनः कीदृशीत्वांप्रतितदनुतनुमुहुः पुनः स्थित्वामरंपश्यास्यादेवंपदानिवितन्वतीविस्ताररूपतीभा
ठांधकारेतमात्वियुक्तेवदाचैव क्रुस्त्रः स्थितो भविष्यतीत्याशयेनचायमेव क्रमस्मृतिभ्रमात्तदंतिकसुपेत्यपश्चादिशोवहर्षेणमति तनउत्पापपुनरधेनधेन्ये

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदं पदानि वितन्वतीम् । कथ
मपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥ इति गी
तगोविंदे पंचमः सर्गः

ष्य

वंप्रतितरुस्थित्वा स्थित्वागच्छन्तीमितिभाव। पुनः कीदृशीं कथमपि शनैः स्मरणाकेनपादिनारहएकांतस्थलंप्राप्तंपुनः कीदृशी अनंगतरंगिभिरनंगस्यका
मस्योर्मुः पुनःपुनरुद्वेगस्तरंगैस्तैरुड्वैःमुपलक्षितांता। अंगमेत्यतृद्विशेषणोत्तनीमानोन्नूपाः कतिसज्जितेसुविरलाविद्धःगुणग्राहिणास्तन्मध्ये पिनवप्रबंधरचना
